## ।। अथ त्रिंशोऽध्याय : ।। chapter-30

वसिष्ठ उवाच :-ततो जयेश्वरं गच्छेत्तीर्थं पापप्रणाशनम्[१]

स्त्रवन्त्या उत्तरे कूले लिङ्गं परमशोभनम् ।। १

गोतमस्य कुले जातो मण्डूको नाम वै द्विज: ।।

जाता तस्यातिवार्द्धक्ये दुहितापुण्यलक्षणा ।। २

शिशुत्वे वर्तमानायामथ तस्यां मृगीदृशाम् ।।

जननी-निधनं प्राप्ता कालेन महता नृप ।। ३

विषादं परमं प्राप्त: पत्नीनाशाद् द्विजोत्तम: ।।

वनं जगाम मण्डूक: कृत्वा दुहितरं करे ।। ४

स्त्रवन्तीतीरमासाद्य बालां पश्यन्विमातरम् ।।

अन्ते वयसि सम्भूतां विललाप सदु:खित: ।। ५

मण्डूक उवाच :- देहो मे जरया जीर्ण: पलितं तु शिरोऽभवत ।।

जिह्मताराभवद्दृष्टिर्वेपन्तेऽङ्गानि सर्वत: ।। ६

---

१ क, सी डी० ई- मर्थप्रदंनृणाम् ।

क्व भविष्यति मे पुत्री मातृहीना मृते मयि ॥
साम्प्रतं[1] मम वृद्धस्य शक्तिनास्ति धनार्जने ॥ ७

बालत्वे मरणं मातुर्यौवने पतिपञ्चता ॥
पुत्रनाशस्तु[2] वार्द्धक्ये जायते हन्त पाप्मनाम् ॥ ८

अप्रतिग्रहशीलस्य नास्ति मे धनमर्जितम् ॥
कन्येयं मम येन स्यात्स्पृहणीया द्विजन्मनां[3] ॥ ९

पुत्रमाकाङ्क्षतो नित्यं चिराल्लब्धा मनोरथैः ॥
क्व भविष्यति मे पुत्री मृते मयि तपस्विनी ॥ १०

यस्यां वै जायमानायां जयो मे समभूत्तत:[4] ॥
जया नाम कृतं तस्या[5] कष्टकालायमागत: ॥ ११

अरण्ये रुदितं व्यर्थमथवा मम सम्प्रति ॥
स्वकृतानां फलं भुङ्क्ते नर: प्राक्तनकर्मणाम् ॥ १२

---

१ ए साम्प्रतंम

२ ए पुत्रनाशस्तुवार्द्ध

३ ए दृिजन्मनां

( ए ४) जितं मवायमेतिह

(ए ५) तस्या:

पापं सुखेच्छया कुर्वन्मन्दबुद्धिरहो नर: ।।
भवेन्मर्मम्घ्रमायत्यां न बिजानाति किंचित् ।। १३

अस्या हितायदेहस्यकृतैपातकंनर: ।।
नादात्मकसुखभ्रान्तौ बालकीबाहरेदधि ।। १४

भविष्यति वृथा चिन्ताकर्मपाकगता मम ।।
यावज्जीवामि मां बालां वर्द्धयिष्येऽशनादिभि: ।। १५

वसिष्ठ उवाच :- इत्थं विलप्य करूणं नद्यास्तीरे द्विजोत्तम: ।।
प्रेकृतिं स्वयमेवाप्य वनदाहाद्यथानल: ।। १६

अथ श्यामाकनीवारै: कन्दमूलफलैस्तथा ।।
लालयन्मधुरालापैर्द्विजेन्द्रस्तामबर्द्धयत् ।। १७

ततस्तस्या महाराज प्राप्ते सम्बत्सरेऽष्टमे ।।
नद्यास्तीरे प्रियान्प्राणानत्यजद्द्विजसत्तम: ।। १८

---

१ बी ई मर्मच्छिद्रुरमायाति न विजानाति
२ बी ई तदात्मिक
३ ए मद्या
( ए १) मर्माच्छिद्रुरनायत्यां
( ए २) हरेवधि

पितर्युपरते बाला जया शोकसमाकुला ।।
संस्कारमकरोत्तस्य प्रेरिता मुनिभिः क्षणात् ।। १९

अथ सा तटिनीतीरे विलपन्ती मुहुर्मुहुः ।।
वृक्षखण्डे महल्लिङ्गं कस्मिंश्चन निरैक्षत ।। २०

सा तत्रास्थितिमाधाय तन्वी कमललोचना ।।
त्रिकालमर्चनं तस्मै कुरुते कृत्तिवाससे ।। २१

सुकुमारैः स्वयंलूनैर्बिल्वपत्रैरनेकशः ।।
आहारमपराह्णे वै फलैर्बिल्वसमुद्भवैः ।। २२

एकदा तु स्मरन्ती सा पितुः सम्प्राप्तयौवना ।।
रुरोदभृशदुःखार्ता पूजाकाले कपर्दिनः ।। २३

मध्याह्ने शिशिरप्रान्ते करुणाकृष्टमानसः ।।
प्रत्यक्षोऽभून्महादेवः सप्तभिः सह मातृभिः ।। २४

तामुवाच द्विजसुतां पाणिनाश्रूणि मार्जयन् ।। २५

-----

(ए १) कस्मिंश्चिन्निरैक्षत

२ बी फलैः

१ ग सातत्रास्थिति

देवदेव उवाच :- मारोदीः पुत्रि कान्तारे किं करोमि कुमारिके[1] ।।
यत्तेस्तिदुर्लभं किञ्चित्तत् समाचक्ष्व मा शुचः ।। २६

जयोवाच :- न मे पिता न मे माता न मे बंधुः कुतश्चन ।।
प्राप्तो विवाहकालोद्य कश्च मे भविता वरः ।। २७

देवदेव उवाच :- अहं तव पिता वत्से ह्यमास्ते सप्तमातरः ।।
प्राप्तस्ते भविता भर्ता ब्राह्मणो मदनुज्ञया ।। २८

अतः परमपि प्रीतः पुत्रि किं ते करोम्यहम् ।। २९

जयोवाच :- यदि मे शङ्करस्तातः शक्तयः सप्त मातरः ।।
अतः प्रियतरं नास्तिह मम लोकेषु किञ्चन ।। ३०

श्री महादेव उवाच :- जयायाः परितुष्टेन प्रादुर्भूतं मयात्र वै ।।
जयेश्वरमिति ख्यातमेतल्लिङ्गं भविष्यति ।। ३१

यः स्रवन्तीजले स्नात्वा नरो मामर्चयिष्यति ।।
कदाचिन्न कुले तस्य दुःखमेतद्भविष्यति ।। ३२

---

१ बी ई कुमारिते

शुक्लफाल्गुनमासस्यैवचतुर्दश्यादिनेपुमान् ।। ३३

दृष्ट्वाजयेश्वरंदेवंशिवलोकंगमिष्यति ।। ३४

मातर उवाच :- मातरस्तैवयंपुत्रिकृतादेवेनशम्भुना ।।

यदत्रभिप्रेतमत्रास्तेब्रूहित्वत्करवामकिं ।। ३५

यदिमंमातरस्तुष्टादास्यन्तिवरमीप्सितं ।।

सदास्थेयंतदत्रैवजयेश्वरसमीपत: ।। ३६

अत्रस्त्रियोनमस्यन्तिया: कश्चित्पुत्रहैतवे[१] ।।

तान्या: पुत्रामहात्मानोदेयायुष्माभिरन्वहं ।। ३७

मातर ऊचु:- अस्त्वेवंप्रीणनार्थायतवमण्डूकनन्दिनी ।।

स्त्रीणांपुत्रान्प्रदास्यामिर्वाञ्छितांश्चमनोरथान् ।। ३८

वसिष्ठ उवाच :- इत्युक्तान्तर्दधेराजन्सेश्वरंमातृमंडलं ।।

सातत्रचकाराकार्शिम्भो: कामप्रदायिन: ।। ३९

----

१ ई-क- सी डी स्त्रियो त्र प्रणमिष्यन्ति

प्रभातेऽथ महेशस्य स्मारन्त्या वाक्यमुत्तमम् ।।
दिग्विलोकनलीलायाः प्राप्तस्तत्र महानृषि ।। ४०

कमण्डलुधरः स्रग्वी दण्डकृष्णाजिनान्वितः ।।
त्रिषु लोकेषु विख्यातो नाम्ना मड्कि[?]रिति श्रुतः ।। ४१

उद्वाहिताथ सा कन्या तेन कृत्वा स्वयं विधिम् ।।
प्रणत्य शङ्करं देवमिदमाह जयां प्रियाम् ।। ४२

मड्किरुवाच :- गन्तव्यमाश्रमे तूर्णं मुग्धे तत्रावयोरितः ।।
यत्र कामफलाव वृत्ता भद्रा नाम महानदी ।। ४३

तदत्र कृत्यशेषं स्यात्तदाचक्ष्व मे प्रिये ।। ४४

जयोवाच :- अत्र शम्भुप्रसादेन जाता मे सप्तमातरः ।।
स्थितिमत्र करिष्यन्ति प्रतिष्ठापनतो विभो ।। ४५

वसिष्ठ उवाच :- इतिश्रुत्वा जयावाक्यं प्रसन्नवदनो मुनिः ।।
दैवीर्धर्ममयीः कृत्वा मन्त्रन्यासं चकार ह ।। ४६

---

१ ई धरा :
२ ई क- सी डी १ प्रभो

१
ततः सम्पूज्य विधिवत् प्रणम्य च पुनः पुनः ।।
जयामादाय मुदितौ ययौ मङ्कुकिर्निजाश्रमं ।। ४७

तस्याः कालेनतन्वङ्ग्याः सूनवोब्रह्मवित्तमाः ।।
माङ्कुक्यादभ्यजायन्त पुत्रा दान्ता जितेन्द्रियाः ।। ४८

तप्त्वा तपांसि तीव्राणि सह पित्रा मनीषिणः ।।
ब्रह्मलोकमितः प्राप्ता मंकुकीतनया नृप ।। ४६

एतत्ते कथितं राजन् जयेश्वरकथानकम् ।।
यच्छ्रुत्वा मानुषो लोके शिवलोकं नरो व्रजेत् ।। ५०

कन्यादानं प्रशंसन्ति तत्रराजन्महर्षयः
अर्च्चनाद्देवदेवस्य जलाधारकृताह्वनः ।। ५१

कन्यादानं जयेशस्य जलाधारे समाचरन् ।।
नरः कोटिशतं साग्रं शिवलोके महीयते ।। ५२

---

इति श्री स्कंद पुराणे एकाशीति साहस्त्र्यां

संहितायां ब्राह्म विभागे तृतीय परिच्छेदे श्रीमाल

माहात्म्ये जयेश्वर माहात्म्यं नाम त्रिंशोऽध्यायः ।।३०।।

-0-

२ ई बी- पुत्रा जाता १ ए पुज्य (ए २) जलाधारिकृतालनां